# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – मार्च-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–शास्त्री-2(SEM-4) | **प्रश्नपत्रम्** – ७ | **गुणा:** – ७० |
| **विषय:** – क्रियात्मकसंस्कृतशिक्षणम् | **कोड- CE- 244** | **समय:** – ३ त: ६ |
| **दिनाङ्क:** –०५/०४/२०१९ | **सन्दर्भग्रन्थ:**–द्वितीयदीक्षा – व्यवहारप्रदीप: –द्वितीयभाग: | |

---

**॥ प्रथमान्विति: ॥** (Unit-1)

**प्रश्न: १ अधोदत्तानि धातुरूपाणि उपयुज्य दशवाक्यानि रचयत ।** १०

(१) मोदन्ते (२) लभेते (३) सेवताम् (४) मन्यन्ताम् (५) भाषस्व (६) शोभिष्यते

(७) वर्तिष्यन्ते (८) अकम्पन्त (९) अवन्दे (१०) पलायन्त (११) कामयामहे (१२) चोरयते

**प्रश्न: २ निर्देशानुसारं रिक्तस्थानानि पूरयत ( कानि अपि पञ्च )** ०५

१ बालक: शिक्षकं ...................... । (परि + पृच्छ् + लट्)

२ छात्र: परीक्षायां प्रथमस्थानं .................. । (प्र + आप् + लट्)

३ वरुण: पर्वतम् .................... । (आ + रुह् + लट्)

४ भक्त: मन्दिरं ....................... (प्र + विश् + लङ्)

५ लेखक: पत्रं .................... (वि + लिख् + लङ्)

६ रमेश: वस्त्राणि ....................... । (प्र + क्षाल् + लट्)

७ धर्मेन्द्र: सम्यक् .................... । (अभि + नी + लट्)

**॥ द्वितीयान्विति: ॥** (Unit-2)

**प्रश्न: ३ निम्नलिखितानि वाक्यानि कर्मणि वाच्ये परिवर्तयत । ( कानि अपि पञ्च )** ०५

१ बाल: वृक्षान् रक्षति ।

२ स: शिलाम् अक्षिपत् ।

३ कृषक: धेनुम् अपालयत् ।

४ गुरु: शिष्यम् उपादिशत् ।

५ विद्यार्थी पाठं पठतु ।

६ गणेश: वरं यच्छति ।

७ श्यामा श्लोकं वदति ।

**प्रश्न: ४ विशेष्यानुगुणं विशेषणानां रूपाणि लिखत ।( कानि अपि दश )** १०

१ (पुरातन)................ भारते संस्कृतं जनभाषा आसीत्।

२ अहं (दीर्घ) ...................... कथां पठामि ।

३ स: (वृद्ध) .................. जनेन सह भाषते ।

४ जना: समाजस्य (महत्) उपकाराय सचेष्टा: भवेयु: ।

५ त्वम् (एतद्) .................. विद्यालये पठसि ।

६ (उत्तम) .................. क्रीडापटु: प्रान्तरे क्रीडति ।

७ (वृद्धा) .................... महिलाया: गृहं नास्ति ।

८ ते (सकला) .................. विद्यानाम् अभ्यासं कुर्वन्ति।

९ (नूतन) ...................... रथेषु मूर्तयः सन्ति।

१० (कोमल) ................ पत्रात् सुगन्धः प्रसरति।

११ शिक्षकः (क्लिष्ट) ................ विषयम् अध्यापयति।

१२ पर्वतारोही (उत्तुङ्ग) .................... पर्वतम् आरोहति।

**प्रश्नः ५ मञ्जूषातः पदानि गृहीत्वा यथोचितं रिक्तस्थानं पूरयत। ( कानि अपि पञ्च ) ०५**

[कश्चित्] [काचित्] [किञ्चन]

(१) ...................... बालकः आगमिष्यति। (२) .................... युवतिः नृत्यति।

(३) ......................... अध्यापकः पाठयति। (४) .......................... फलं पतति।

(५) ........................... वस्तु अस्ति। (६) ....................... वक्ता हिन्दीभाषया भाषितवान्।

(७) ......................... वस्तु हस्तात् पतितम्।

**प्रश्नः ६ अधोदत्तानि संख्यावाचक-पूरणप्रत्ययान्तपदानि चित्वा पञ्च वाक्यानि रचयत। ०५**

(१) द्वे (२) चत्वारि (३) चतुरः (४) तृतीया (५) एकादशः (६) चतुर्थम् (७) त्रीणि।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ७ अधोनिर्दिष्टेषु वाक्येषु विशेष्यानुगुणं शत्रन्तरूपाणि लिखत। १०**

१ बालकः (खाद्) .................... पठति।

२ ते अर्थं (ज्ञा) ............. पठन्ति।

३ माता गृहकार्यं (कृ) .................. स्वपुत्रं पश्यति।

४ ग्रन्थकारौ (चिन्त्).................... पुस्तकं लिखतः।

५ बालिका (खाद्) .................. क्रीडति।

६ गृहिणी पुत्रं (स्मृ) .................. चायं पिबति।

७ जलं (वह्) ................... अस्ति।

८ विमानं जनान् (नय्) ................ आकाशे गच्छति।

९ महिला (जल्प्)........................ कार्यं करोति।

१० यात्रिकाः (दृश्) .................. यानेन गच्छन्ति।

**प्रश्नः ८ अधोदत्तानि शानजन्तरूपाणि उपयुज्य दश वाक्यानि आरचयत। १०**

(१) सेवमानः (२) वन्दमानः (३) भाषमाणाः (४) शोभमानम् (५) शयाना (६) मोदमाना (७) अधीयानः (८) पचमानम् (९) वेपमानम् (१०) रममाणा (११) वर्तमानः (१२) वर्धमानः।

**प्रश्नः ९ निर्देशानुसारं रिक्तस्थानानि पूरयत। १०**

१ भक्तः देवं .............................। (वन्द् + लट्)

२ छात्रः ग्रन्थं .......................। (सेव् + लोट्)

३ गुरुः शिष्यम् ...................। (अनु + गम् + लङ्)

४ राजीवः गृहपाठं ................. क्रीडाङ्गणं गच्छति। (सम् + आप् + ल्यप्)

५ यात्रिणा नदी ..................। (तर् + लट्)

६ (उत्तम) ..................... छात्राः राष्ट्रस्य निधयः सन्ति।

७ ............... भवनानि नष्टानि सन्ति। (किम् + चन)

८ .................. (त्रि) महिलाः नद्याः आगच्छन्ति।

९ कार्यं .............. सा श्रान्ता। (कुर्वन्ती/कुर्वती)

१० वरं ............... भक्तः तपः करोति। (कामि(कामम्) + शानच्)